**SET – 4**

**Series : SSO/1**

कोड नं.
**Code No. 22/1**

**रोल नं.**
**Roll No.** | | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **12** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (केन्द्रिकम्)
# SANSKRIT (Core)

*अवधि : होरात्रयम् ]* | *[ पूर्णाङ्का : 100*
*निर्धारित समय : 3 घंटे ]* | *[ अधिकतम अंक : 100*
*Time allowed : 3 hours ]* | *[ Maximum marks : 100*

***निर्देशा : :***

*सङ्केताभावे सर्वेषां प्रश्नानामुत्तराणि संस्कृतेनैव लेखनीयानि ।*

*जहाँ स्पष्ट संकेत नहीं हैं, वहाँ उत्तर संस्कृत में ही दीजिए ।*

*Answer the questions in Sanskrit only unless stated otherwise.*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*

*इस प्रश्नपत्र में **चार** खण्ड हैं ।*

*There are **four** sections in this question paper.*

| | | | |
|---|---|---|---|
| खण्ड: क | : | अपठितांश - अवबोधनम् (अपठितांश - अवबोधन ) | **10 अङ्का:** |
| Section A | : | (Unseen Reading Comprehension) | |
| खण्ड: ख | : | संस्कृतेन रचनात्मककार्यम् (संस्कृत रचनात्मक कार्य) | **15 अङ्का:** |
| Section B | : | (Sanskrit Writing Skills) | |
| खण्ड: ग | : | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | **30 अङ्का:** |
| Section C | : | (Applied Grammar) | |
| खण्ड: घ | : | भाग I — पठितांश – अवबोधनम् (पठितांश – अवबोधन) | **35 अङ्का:** |
| Section D | : | PART I — Reading Comprehension | |
| | | भाग II — सामान्य: संस्कृतसाहित्यपरिचय: (सामान्य संस्कृत साहित्य-परिचय) | **10 अङ्का:** |
| | | PART II — General Introduction to Sanskrit Literature | |

## खण्ड: क (SECTION A) **10 अङ्का:**

### अपठितांश – अवबोधनम्

### अपठितांश – अवबोधन

### Unseen Reading Comprehension

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि संस्कृतेन लिखत :
निम्नलिखित गद्यांश को पढ़कर प्रदत्त प्रश्नों के उत्तर संस्कृत में लिखिए :
Read the following passage and answer the given questions in Sanskrit :

**गद्यांश :**

एकत्वभावनया यत् कार्यं क्रियते तद् 'एकता' इति कथ्यते । एकतया मानव: बलवान् भवति । एकतया समाज:, राष्ट्रं जगत् च उन्नतिपथम् अधिरोहति । अद्यत्वे तु संसारे एकताया: अतीवावश्यकता वर्तते । यस्मिन् देशे एकताया अभावो भवति, स देश: स्वकीयां स्वतन्त्रतां रक्षितुं नैव शक्नोति । अस्माकम् अपि देश: एकताया: अभावात् चिरं परतन्त्र: आसीत्, परं यदा भारते एकत्वभावना समुत्पन्ना तदा भारतं स्वातन्त्र्यम् अलभत । एकताया: प्रभाव: जडवस्तुषु अपि दृश्यते । जलबिन्दव: सम्मिल्य नदीरूपं धारयन्ति । क्षुद्रतन्तव: अपि सम्मिल्य यदा रज्जुरूपं धारयन्ति, तदा ते बलशालिनं गजम् अपि नियन्त्रयितुं समर्था भवन्ति । यदा अस्माकं विचारा:, मनांसि, गमनं भाषणं संकल्पश्च एकत्वभावनया परिपूर्णा भवन्ति, तदा न किमपि असाध्यं भवति । संसारस्य प्राचीनतमे ग्रन्थे ऋग्वेदे अयमेव सन्देश: "संगच्छध्वं संवदध्वम्" – इत्यादिमन्त्रेण मानवकल्याणाय प्रदत्त: ।

**प्रश्ना:**

(अ) एकपदेन उत्तरत । $\frac{1}{2} \times 4 = 2$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) मानव: केन बलवान् भवति ?

(ii) क्षुद्रतन्तव: सम्मिल्य किं रूपं धारयन्ति ?

(iii) अद्यत्वे कस्या: अतीवावश्यकता वर्तते ?

(iv) क्षुद्रतन्तव: कं नियन्त्रयितुं समर्था: ?

(ब) पूर्णवाक्येन उत्तरत । **1 × 2 = 2**
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence.
(i) कदा किमपि असाध्यं न भवति ?
(ii) यस्मिन् देशे एकतायाः अभावः, तत्र किं भवति ?

(स) यथानिर्देशम् उत्तरत । **1 × 4 = 4**
निर्देशानुसार उत्तर दीजिए ।
Answer as directed.
(i) 'स्वाधीनता' इत्यर्थे किं पदम् अत्र प्रयुक्तम् ?
(ii) 'विनाशयितुम्' इत्यस्य किं विलोमपदम् प्रयुक्तम् ?
(iii) 'गजम्' इत्यस्य किं विशेषणपदम् अत्र प्रयुक्तम् ?
(iv) 'अलभत' इति क्रियापदस्य कर्तृपदं किम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । **2**
इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।
Write a suitable title for this passage in Sanskrit.

## खण्डः ख (SECTION B) — 15 अङ्काः

### संस्कृतेन रचनात्मककार्यम्
### संस्कृत रचनात्मक कार्य
### Sanskrit Writing Skills

2. भवती रमा । भवत्सखी शकुन्तला हरिद्वारे वसति । 'भारत – स्वच्छताभियानविषये' तां प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषापदैः पूरयित्वा पत्रं पुनः लिखत ।

आप रमा हैं । हरिद्वार में रहने वाली अपनी सखी शकुन्तला को 'भारत-स्वच्छता अभियान' के विषय में लिखे पत्र में रिक्त स्थानों की मञ्जूषा प्रदत्त पदों की सहायता से पूर्ति कर पत्र को पुनः लिखिए । $\frac{1}{2} \times 10 = 5$

You are Rama, Your friend Shakuntala lives in Haridwar. In a letter written to her about 'Clean India Movement', fill in the blanks from the words given in the box & rewrite the same.

**पत्रम्**

प्रिय सखि __(i)__,
सप्रेम नमो नमः
अत्र कुशलं तत्रास्तु । __(ii)__ नूनं श्रुतं स्यात् यद् __(iii)__ प्रधानमन्त्रिणा भारतं स्वच्छीकर्तुम् __(iv)__ एकं प्रवर्तितम् । भारते ग्रामेषु नगरेषु च स्वच्छतायाः अभावः __(v)__ । बहवो जनाः __(vi)__ अस्वच्छम् अवकरं __(vii)__ येन तज्जलं कीटाणुमयं भवति । तच्च पीत्वा लोकाः __(viii)__ ग्रस्ता भवन्ति । अतः इदम् अस्माकं कर्तव्यमस्ति यद् वयं लोकान् अस्मिन् विषये __(ix)__ कुर्याम । त्वमपि अस्मिन् अभियाने यथाशक्ति स्वीयं योगदानं कुरु । मातापितृचरणेषु मे प्रणामाञ्जलीन् __(x)__ ।
शीघ्रं पुनर्मेलिष्यावः ।

तव सखी,
रमा ।

**मञ्जूषा**

| |
|---|
| निवेदय, शकुन्तले, जागरूकान्, त्वया, विविधरोगैः, अस्माकम्, प्रक्षिपन्ति, अभियानम्, नदीषु, दृश्यते । |

3. मञ्जूषाप्रदत्तशब्दानां सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुन: लिखत :

मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित लघुकथा में रिक्त स्थानों की पूर्ति कर कथा को पुन: लिखिए :

$\frac{1}{2} \times 10 = 5$

Fill in the blanks of the following short story with the help of the words given in the box below and rewrite the same :

पुरा दक्षिणभारते ____(i)____ एक: विशाल: वृक्ष: आसीत् । तत्र ____(ii)____ नीडानि आसन्, येषु खगा: स्वशिशुभि:____(iii)____ सुखेन कालं यापयन्ति स्म । ____(iv)____ तत्र महती वृष्टि:____(v)____ । सर्वे पशव: स्वप्राणानां रक्षायै इतस्तत:____(vi)____ । तदा शीतेन कम्पमान: कश्चन ____(vii)____ तत्र आगच्छत् । तस्य तां दशां विलोक्य ____(viii)____ वानरम् अवदन्.____(ix)____ वानर ! मानवस्य इव ते अपि हस्तौ पादौ च सन्ति । त्वमपि ____(x)____ निर्माणं कृत्वा सुखेन कालं यापय, कष्टस्य अनुभवं मा कुरु ।

**मञ्जूषा**

| |
|---|
| गृहस्य, नर्मदातटे, भो, अनेकानि, खगा:, सह, वानर:, एकदा, अधावन्, संजाता । |

4. मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** संस्कृतवाक्येषु 'सत्संगते: महत्त्वमिति' विषये वर्णनं कुरुत । **1 × 5 = 5**

मञ्जूषा में दिए गए शब्दों की सहायता से 'सत्संगति के महत्त्व' के विषय में **पाँच** वाक्य संस्कृत में लिखिए ।

With the help of the words given in the box below, write **five** sentences in Sanskrit on the Importance of 'सत्संगति: ।'

**मञ्जूषा**

| |
|---|
| सताम्, सज्जन:, दुर्जनानाम्, कालम्, पुष्पसंगात्, हितकारिणी, सेवनीया, त्याज्या, कुसंगति: देवानाम् । |

## खण्ड: ग (SECTION C) — 30 अङ्का:

### अनुप्रयुक्तव्याकरणम्

### अनुप्रयुक्त व्याकरण

### Applied Grammar

5. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं कुरुत : **1 × 6 = 6**

निम्नलिखित वाक्यों में रेखांकित पदों का सन्धिच्छेद कीजिए :

Disjoin Sandhis in the underlined words of the following sentences :

(i) '<u>यथान्ध</u>कारादिव ।'

(ii) '<u>सोऽयं</u> व्यायामकाल: ।'

(iii) 'निमज्जतीन्दो: <u>किरणेष्विवाङ्क:</u> ।'

(iv) '<u>लोभश्चेद्</u> अगुणेन किम् ?'

(v) '<u>हितान्न</u> य: संशृणुते स किंप्रभु: ।'

(vi) 'अद्य <u>ममोपवास:</u> ।'

6. अधोलिखितवाक्येषु रेखाङ्कितसमस्तपदानां विग्रहा: लेख्या: : **1 × 6 = 6**

निम्नलिखित वाक्यों में रेखांकित समस्त पदों के विग्रह लिखिए :

Expound the underlined words of the following sentences :

(i) '<u>आप्तकामा</u> ऋषय: ।'

(ii) '<u>अनभियुक्तानां</u> राज्ञाम् ।'

(iii) 'रतिं कुर्वते <u>सर्वसम्पद:</u> ।'

(iv) 'अयमेव <u>अहोरात्रं</u> जनयति ।'

(v) 'दुराराध्या हि <u>राजलक्ष्मी:</u> ।'

(vi) 'अनेनैव कृता: <u>कल्पभेदा:</u> ।'

7. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गत-प्रकृतिप्रत्ययौ योजयित्वा रिक्तस्थानानि पूरयत : **1 × 8 = 8**

निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय को जोड़कर रिक्त स्थानों की पूर्ति कीजिए :

Fill in the blanks in the following sentences by adding suffixes to the roots or words given in the brackets :

(i) तत: प्रभाते अत्र ________ । (आ + गम् + तव्यत्)

(ii) किमर्थं वयम् ________ । (आ + ह्वे + क्त)

(iii) सूचनापट्टे ________ अस्ति । (वि + ज्ञप् + क्तिन्)

(iv) मत्स्यजीविभि: सर: ________ नीतम् । (निर्मत्स्य + तल्)

(v) ________ यद्यस्ति किं पातकै: ? (पिशुन + तल्)

(vi) इदम् अभियानं ________ आसीत् । (साहस + ठक्)

(vii) किम् एतत्सर: ________ युज्यते । (त्यज् + तुमुन्)

(viii) अहो ! एषा हि ________ विभूति: । (राजमन्त्र + इन्)

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयो: अन्विति: क्रियताम् : **1 × 5 = 5**

निम्नलिखित वाक्यों में कर्ता एवं क्रियापदों की अन्विति कीजिए :

Write the suitable verbs according to the subject in the following sentences :

(i) अयं स्तूप: रात्रौ आलोकं _______ (वितरति/वितरन्ति)

(ii) अये सिंहासनम् _______ वृषल: (अध्यास्ते/अध्यसते)

(iii) अद्य तु आहारवृत्ति: _________ (सञ्जात:/सञ्जाता)

(iv) _______ सङ्गणकस्य प्रयोगं कुर्म: । (अहम्/वयम्)

(v) धवला: गिरय: ________ । (शोभते/शोभन्ते)

**अथवा / OR**

अधोलिखितेषु वाक्येषु विशेष्यैः सह मञ्जूषायाः विशेषणानि योजयत : **1 × 5 = 5**

निम्नलिखित वाक्यों में विशेष्यों के साथ मञ्जूषा से विशेषण पदों को जोड़िए :

Add the appropriate adjectives from the box, with their qualifying nouns in the following sentences :

(i) ________ समये राष्ट्रचिन्ता गरीयसी ।

(ii) अयमेव वत्सरं ________ भागेषु विभनक्ति ।

(iii) एष एव अङ्गीकरोति उत्तरं ________ चायनम् ।

(iv) राजलक्ष्मीः हि ________ भवति ।

(v) एवं _______ भोजनानां दात्री भव ।

**मञ्जूषा**

| |
|---|
| शोभनानाम्, अस्मिन्, दुराराध्या, द्वादशसु, दक्षिणम् । |

9. अधोलिखितेषु वाक्येषु कोष्ठकप्रदत्तशब्दैः सह उपयुक्तां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत : **1 × 5 = 5**

निम्नलिखित वाक्यों में कोष्ठक में दिए गए शब्दों में उपयुक्त विभक्ति का प्रयोग कर रिक्त स्थानों की पूर्ति कीजिए :

Fill in the blanks using appropriate case endings (विभक्ति) with the words given in the brackets in the following sentences :

(i) अलं भवतः ________ । (सन्ताप)

(ii) ________ गुरोः आज्ञा पालनीया । (शिष्य)

(iii) वेदाः एतस्य ________ । (वन्दिन्)

(iv) अहं ________ दूरमारोप्य पातितोऽस्मि । (पर्वत)

(v) ________ न यः संशृणुते । (हित)

## खण्डः घ (SECTION D) **35 अङ्काः**

### भाग – I

### PART – I

### पठितांश – अवबोधनम्

### पठितांश – अवबोधन

### Reading Comprehension

10. अधोलिखितं पद्यं, गद्यांशं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित पद्य, गद्यांश तथा नाट्यांश को पढ़कर उन पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following poetry, prose and drama passages and answer the questions based on them in Sanskrit :

(क) **पद्यम्** :

"वदनं प्रसादसदनं सदयं हृदयं सुधामुचो वाचः ।
करणं परोपकरणं येषां केषां न ते वन्द्याः ।।"

**प्रश्ना:**

(अ) एकपदेन उत्तरत । $\frac{1}{2} \times 2 = 1$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) सज्जनानां हृदयं कीदृशं भवति ?

(ii) सज्जनानां करणं कीदृशम् ?

(ब) पूर्णवाक्येन उत्तरत । 1

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

के खलु जनैः वन्दनीयाः भवन्ति ?

(स) यथानिर्देशम् उत्तरत ।

निर्देशानुसार उत्तर दीजिए ।

Answer as directed.

(i) मुखम् इत्यस्य कृते किं पदमत्र प्रयुक्तम् ? $\frac{1}{2}$

(ii) अमृतम् इत्यर्थे किं पदमत्र प्रयुक्तम् ? $\frac{1}{2}$

(iii) 'सुधामुचः' इति विशेषणस्य विशेष्यं किम् ? 1

(iv) 'हृदयम्' इत्यस्य विशेषणं किम् ? 1

(ख) **गद्यांश:**

"वयं वर्तमानकाले सङ्गणकस्य प्रयोगं कुर्मः, परन्तु यदि आर्यभटेन शून्यस्य आविष्कारः न कृतः स्यात् तर्हि संगणकभाषायाः जन्म एव न अभविष्यत् यतः तत्र तु एकं शून्यं च द्वे एव संख्ये महत्त्वपूर्णे । अपि च सूर्यं प्रति पूर्वाभिमुखा पृथिवी 365.25 वारं प्रतिवर्षं भ्रमति । आधुनिकैः वैज्ञानिकैः अपि तथैव मन्यते ।"

**प्रश्ना :**

(अ) एकपदेन उत्तरत । $\frac{1}{2} \times 2 = 1$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) वयं कस्य प्रयोगं कुर्मः ?

(ii) पृथिवी कं प्रति परिभ्रमतिः ?

(ब) पूर्णवाक्येन उत्तरत । 1

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

संगणकस्य कृते के द्वे संख्ये महत्त्वपूर्णे ?

(स) यथानिर्देशम् उत्तरत ।

निर्देशानुसार उत्तर दीजिए ।

Answer as directed.

(i) 'कुर्मः' इति क्रियापदस्य कर्तृपदं किम् ? $\frac{1}{2}$

(ii) 'प्राचीनकाले' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ? $\frac{1}{2}$

(iii) 'पूर्वाभिमुखा' इति विशेषणस्य विशेष्यं किम् ? 1

(iv) केन विना सङ्गणकभाषायाः जन्म एव नाभविष्यत् ? 1

(ग) **नाट्यांश** :

| | | |
|---|---|---|
| नटी | : | (प्रविश्य आर्य ! इयमस्मि । आर्य ! दिष्ट्या खलु आगतोऽसि । |
| सूत्रधारः | : | आर्ये ! किम् अस्त्यस्माकं गेहे कोऽपि प्रातराशः ? |
| नटी | : | अस्ति, घृतं, गुडं दधि तण्डुलाश्च सर्वम् अस्ति । |
| सूत्रधारः | : | चिरं जीव, एवं शोभनानां भोजनानां दात्री भव । आर्ये ! किमेतत्सर्वम् अस्माकं गेहेऽस्ति ? |
| नटी | : | नहि, नहि अन्तरापणे । |
| सूत्रधारः | : | (सरोषम्) आः अनार्ये ! एवं ते आशा छिद्यताम् । अहं पर्वताद् दूरमारोप्य पातितोऽस्मि । |
| नटी | : | मा बिभीहि, मा बिभीहि । मुहूर्तकं प्रतिपालयतु आर्यः । अद्य ममोपवासः अस्ति । सर्वं सज्जं भविष्यति । यदि आर्यस्यानुग्रहः स्यात् तर्हि अस्मादृशयोग्यं कञ्चिद्जनं निमन्त्रयितुम् इच्छामि । |

**प्रश्नाः**

(अ) एकपदेन उत्तरत । $\frac{1}{2} \times 2 = 1$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) सर्वे भोज्यपदार्थाः कुत्र आसन् ?

(ii) सूत्रधारः कुतःआरोप्य पातितः ?

(ब) पूर्णवाक्येन उत्तरत । 1

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

नटी किमर्थं कमपि जनं निमन्त्रयितुम् इच्छति ?

(स) यथानिर्देशम् उत्तरत् ।

निर्देशानुसार उत्तर दीजिए ।

Answer as directed.

(i) 'अस्मि' इति क्रियापदस्य कर्तृपदं किम् ? $\frac{1}{2}$

(ii) 'शोभनानाम्' इति पदस्य विशेष्यं किम् ? $\frac{1}{2}$

(द) (i) 'आर्ये' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ? 1

(ii) 'एवं ते आशा छिद्यताम्' इति वाक्ये 'ते' इति सर्वनामपदं कस्मै प्रयुक्तम् ? 1

11. यथानिर्देशं प्रश्न**द्वयम्** उत्तरत । **2 + 2 = 4**

यथानिर्देश **दोनों** प्रश्नों के उत्तर दीजिए ।

Answer **both** the questions as directed.

(i) 'न कदाचित् आर्यस्य निष्प्रयोजना प्रवृत्तिः ।' इति वाक्यं कः कं कथयति ?

(ii) "सुखं हि दुःखान्यनुभूय शोभते, यथान्धकारादिव दीपदर्शनम्" – इति पङ्क्तेः मूलग्रन्थं लेखकं च लिखत ।

12. प्रत्येकम् अंशस्य प्रदत्तभावार्थ**त्रयात्** शुद्धं भावार्थं चित्वा लिखत । **2 + 2 = 4**

प्रत्येक अंश के लिए दिए गए **तीन** भावार्थों में से शुद्ध भावार्थ का चयन करके लिखिए :

Pick out and write the correct one out of the **three** explanations given for each of the following lines :

(अ) 'सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ।'

  (i) राजनि सचिवेषु परस्परं सहमतेषु राज्यस्य सर्वसमृद्धिर्भवति ।

  (ii) राजनि सचिवेषु च परस्परं विरुद्धेषु सर्वसम्पदः समायान्ति ।

  (iii) प्रजायाः नृपस्य च मध्ये सहमतावस्थायां सर्वसम्पदः समायान्ति ।

(ब) 'लोभश्चेद् अगुणेन किम् ?'

  (i) यदि मनुष्ये एको लोभ एव वर्तते तदा अन्येषां दुर्गुणानां का आवश्यकता ?

  (ii) लोभिनि जने न कोऽपि गुणो भवति ।

  (iii) यदि मनुष्ये लोभः अस्ति तर्हि गुणैः न किमपि प्रयोजनम् ।

**अथवा / OR**

अधोलिखितस्य श्लोकस्य प्रदत्तं भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत : **1 × 4 = 4**

निम्नलिखित श्लोक के दिए गए भावार्थ को मञ्जूषा में दिए गए पदों से पूर्ण कर पुनः लिखिए :

Complete the central idea of the given verse with the words given in the box below and rewrite the same.

"अद्भिः शुध्यन्ति गात्राणि, बुद्धिः ज्ञानेन शुद्ध्यति ।
अहिंसया च भूतात्मा, मनः सत्येन शुद्ध्यति ।।"

**भावार्थः**

अस्माकं ______ जलेन स्वच्छं पवित्रं भवति, बुद्धिः च ______ शुद्धा भवति, यथा यथा वयं ज्ञानं प्राप्नुमः अस्माकं बुद्धिः पवित्रा भवति । मनुष्यस्य ______ अहिंसया शुद्धः भवति ______ च आचरणेन मनः पवित्रं भवति ।

**मञ्जूषा**

| सत्यस्य, शरीरम्, आत्मा, ज्ञानेन । |
|---|

13. अधोलिखितस्य श्लोक**द्वयस्य** प्रदत्तान्वये मञ्जूषात: पदै: रिक्तस्थानपूर्तिं कृत्वा अन्वयं पुन: लिखत: $\frac{1}{2} \times 8 = 4$

निम्नलिखित **दो** श्लोकों के दिए गए अन्वयों में मञ्जूषा के पदों से रिक्त स्थानों की पूर्ति कर अन्वय को पुन: लिखिए :

The prose order renderings of the following **two** verses have been given below. Fill in the blanks from the words given in the box and rewrite the same :

(अ) अशक्तैर्बलिन: शत्रो: कर्तव्यं प्रपलायनम् ।
आश्रितव्योऽथवा दुर्ग: नान्या तेषां गतिर्भवेत् ।।

**अन्वय:**

_______ बलिन: शत्रो: _______ कर्तव्यम्, अथवा _______ आश्रितव्य: ________ अन्या गति: न भवेत् ।

(ब) "व्रजन्ति ते मूढधिय: पराभवम्,
भवन्ति मायाविषु ये न मायिन: ।
प्रविश्य हि घ्नन्ति शठास्तथाविद्यान्
असंवृताङ्गान्निशिता इवेषव: ।।"

**अन्वय:**

ये _______ मायिन: न भवन्ति ते _______ पराभवं व्रजन्ति । शठा: हि _____ इषव इव तथाविधान् ________ प्रविश्य घ्नन्ति ।

**मञ्जूषा**

| |
|---|
| दुर्ग:, मायाविषु, निशिता:, अशक्तै:, मूढधिय:, प्रपलायनम्, तेषाम्, असंवृताङ्गान् । |

14. अधोलिखितानां 'क' – स्तम्भस्य वाक्यांशानां 'ख' – स्तम्भस्य वाक्यांशै: सह सार्थकसम्मेलनं कृत्वा वाक्यानि पुन: लिखत : $1 \times 4 = 4$

निम्नलिखित 'क' स्तम्भ के वाक्यांशों का 'ख' स्तम्भ के वाक्यांशों के साथ सार्थक मिलान कर वाक्यों को पुन: लिखिए :

Match the following sentences of the column 'क' with the suitable sentences of column 'ख' and rewrite the same :

| **(क)** | | **(ख)** | |
|---|---|---|---|
| (i) | एष एव अङ्गीकरोति | (a) | स्फीता भवन्त्यापद: । |
| (ii) | निर्वैरा विमुखीभवन्ति सुहृद:, | (b) | निघर्षणच्छेदनतापताडनै: । |
| (iii) | तृणानि भूमिरुदकम् | (c) | उत्तरं दक्षिणं चायनम् । |
| (iv) | तथा चतुर्भि: पुरुष: परीक्ष्यते । | (d) | वाक्चतुर्थी च सूनृता । |

15. अधोलिखितेषु वाक्येषु रेखाङ्कितशब्दानां प्रसङ्गानुसारं सार्थकम् अर्थं चित्वा लिखत : **1 × 4 = 4**

निम्नलिखित वाक्यों में रेखाङ्कित शब्दों के प्रसङ्गानुसार सार्थक अर्थ चुनकर लिखिए :

Select and write the appropriate meanings of the underlined words according to the reference to the context :

(अ) 'अवलम्बो रोलम्बकदम्बस्य ।'

(i) वृक्ष:

(ii) भ्रमर:

(iii) भूमि: ।

(ब) 'यथा चतुर्भि: कनकं परीक्ष्यते ।'

(i) सुवर्णम्

(ii) पुष्पम्

(iii) कर्ण: ।

(स) 'वेदा: एतस्य एव वन्दिन: ।'

(i) स्तुतिगायका:

(ii) पराधीना:

(iii) वन्द्या: ।

(द) 'आर्यप्रसादात् अनुभूयते एव सर्वम् ।'

(i) आर्यस्य भवनात्

(ii) आर्यस्य कृपया

(iii) आर्यस्य प्रसन्नतया ।

## खण्ड: घ (SECTION D) **10 अङ्का:**

### भाग – II

### PART – II

### सामान्य: संस्कृतसाहित्यपरिचय:

### सामान्य संस्कृत साहित्य-परिचय

### General Introduction to Sanskrit Literature

16. (अ) अधोलिखितेषु कस्यापि **एकस्य** संक्षिप्त: परिचय: संस्कृतेन देय: । **5**

निम्नलिखित में से किसी **एक** का संक्षिप्त परिचय संस्कृत में लिखिए :

Write a brief note on any **one** of the following in Sanskrit :

कालिदास:, विष्णुशर्मा, भारवि: ।

**अथवा / OR**

अधोलिखितेषु मञ्जूषापदसहायतया रिक्तस्थानानि पूरयित्वा पुन: लिखत : $\frac{1}{2} \times 10 = 5$

निम्नलिखित में मञ्जूषा के पदों की सहायता से रिक्त स्थानों की पूर्ति कर पुन: लिखिए :

Fill in the blanks in the following using the words from the box and rewrite the same :

(i) रूपकम् _________ विभज्यते ।

(ii) शिवराजविजयस्य लेखक: ________ अस्ति ।

(iii) कुमारसम्भवं ________ लिखितम् ।

(iv) चाणक्यचन्द्रगुप्तयो: वर्णनं __________ वर्तते ।

(v) विष्णुशर्मणा _________ लिखितम् ।

(vi) 'चारुदत्तम्' इत्यस्य लेखक: ________ अस्ति ।

(vii) ________ संस्कृतवाङ्मयस्य विशालतमो ग्रन्थ: ।

(viii) सर्गबन्धरचना ________ अभिधीयते ।

(ix) ________ अर्थगौरवं प्रसिद्धम् ।

(x) दूतकाव्ये _________ भवति ।

**मञ्जूषा**

| |
|---|
| सन्देश:, अङ्केषु, भारवे:, अम्बिकादत्तव्यास:, महाकाव्यम्, कालिदासेन, महाभारतम्, भास:, पञ्चतन्त्रम्, मुद्राराक्षसे । |

(ब) संस्कृतमहाकाव्यस्य का: अपि **पञ्च** विशेषता: संस्कृतेन लिखत । 5

संस्कृत महाकाव्यों की किन्हीं **पाँच** विशेषताओं को संस्कृत में लिखिए ।

Write any **five** characteristics of Mahākāvya in Sanskrit.